**अनुवृत्** त्रि॰ अनु पश्चात् वर्त्तते अनु+वृत-क्विप्। पश्चाद्वर्त्तिनि पश्चाद्भाविनि अनुगते च "अनुवृदस्यनुवृते" इति ता॰ब्रा॰।

**अनुवृत्त** त्रि॰ अनु+वृत-क्त। अनुगते, पूर्वस्थलादपरस्थले आकाङ्क्षापूरणार्थम् अन्विते पदादौ, अनुक्रमेण वृत्ततामाप्ते क्रमशः वर्त्तुलाकारे। अनुगतो वृत्तं शीलम् अत्या॰स॰। शीलानुगते त्रि॰।

**अनुवृत्ति** स्त्री अनु+वृत-क्तिन्। अनुसरणे, सेवने, पूर्वस्थलादुत्तरस्थले आकाङ्क्षापूरणार्थमनुसरणे च। "कुशीदकृषिवाणिज्यशुल्कशालानुवृत्तिभिः कृतोपकारादाप्तञ्च राजसं समुदाहृतमिति" नारदः। "अनुवृत्तिः सेवेति" रघु॰। "अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृतामिति" देवी॰ तत्सत्त्वे तत्सत्त्वरूपे अन्वये, समन्वये च। एवं व्यावृत्त्यनुवृत्तिभ्यामन्नमयत्वं मनसः सिद्धमिति छा॰ उप॰भा॰।"जन्माद्यस्य यतोऽन्वयादिति"भागव॰। "अन्वशब्देनानुवृत्तिरिति" श्रीधरः नह्यवबुद्धस्वभावा भिषजः स्वस्यानुवृत्तिं रोगनिग्रहणञ्च कर्त्तुं समर्था इति सुश्रुतम् "यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परेति" सा॰द॰। दोषः दोषा च तदनुवृत्तिः सेवा अनुसरणञ्चेति तदर्थः।

**अनुवेध** पु॰ अनु+विध-घञ्। संसर्गे। "नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशा" इति सा॰द॰।

**अनुवेल** न॰ वीप्सार्थे अव्ययी॰। प्रतिसमये अनुक्षणे "इति स्म पृच्छत्यनुवेलमादृत" इति रघुः। अर्श आदि॰ अस्त्यर्थे अच्। तद्वृत्तौ त्रि॰।

**अनुवेल्लित** न॰ अनु+वेल्ल-क्त। सुश्रुतोक्ते व्रणलेपनबन्धभेदे। बन्धाश्च "कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगिकायमकखट्टाचीनविबन्धवितानगोफणा पञ्चाङ्गी चेति चतुर्दश बन्धविशेषाः तेषां नामभिरेवाकृतयः प्रायेण व्याख्याता" इति सुश्रुतोक्ताः वेदितव्याः। तत्र अनुवेल्लितं तु शाखासु इति वैद्यकप्रसिद्धिः।

**अनुवेश** पु॰ अनु+विश-घञ्। ज्येष्ठातिक्रमेण कनिष्ठस्य विवाहे "यवीयसोऽनुवेशो हि ज्येष्ठस्य विधिलोपक" इति भार॰।

**अनुवेश्य** त्रि॰ अनुक्रमेण वेशमर्हति यत्। प्रतिवेश्यानन्तरवासिनि। "प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" इति मनुः। "अनुवेश्यः प्रातिवेश्यानन्तरगृहवासीति कुल्लू॰।

**अनुव्य** त्रि॰ अनुव्ययति अनुगच्छति अनु+व्ये-क। अनुगते ततो देवा अनुव्यमिवासुः का॰ १,२,५, अनुव्यम् अनुगमनं न्यग्भूतिं "प्राप्ता इव बभूवुरिति" तद्भा॰।

**अनुव्याख्यान** त॰ अनुरूपं व्याख्यानम् प्रा॰स॰। मन्त्रादीनामनुरूपार्थप्रकाशके व्याख्याने। [कथने च।

**अनुव्याहार** पु॰ अनु+वि+आ+हृ-घञ्। अनुवादे, एह-

**अनुव्रजन** न॰ अनु+व्रज+भावे ल्युट्। अनुगमने अनुव्रजनं च गच्छतोऽतिस्निग्धादेः जलसमीपपर्य्यन्तानुधावनम् तथैवोपमाविधया वर्णितं नैषधे "वनान्तपर्य्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नथ तीर्णदृक्पथे। न्यवर्त्ति दृष्टिप्रकरैः पुरौकसामनुव्रजद्बन्धुसमाजबन्धुभिरिति"।

**अनुव्रज्या** स्त्री अनु+व्रज-क्यप्। अनुसरणादिरूपे सेवने। "अब्राह्मणादध्ययनमापत्काले विधीयते। अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोरिति" मनुः।

**अनुव्रत** त्रि॰ अनुकूलं व्रतं कर्म्म यस्य। अनुकूलकर्म्मयुक्ते। "अनुव्रताय रन्धयन्नपव्रतायेति ऋ॰ १,५,८, अनुव्रताय अनुकूलकर्म्मणे इति भा॰। वैश्याः क्षत्रमनुव्रताः रामा॰

**अनुशतिकादि** न॰ ६ब॰ पाणिनीयगणपाठोक्ते ञिति णिति किति च तद्धिते परे द्विपदयोराद्यचोर्वृद्धिनिमित्तीभूते शब्दसमूहे, स च गणः। अनुशतिक, अनुहोड़, अनुसंवरण, अनुसंवत्सर, अङ्गारवेणु, असिहत्य, अस्यहत्य, अस्यहेति, वध्योग, पुष्करसद्, अनुहरत्, कुरुकत, कुरुपञ्चाल, उदकशुद्ध, इहलोक, परलोक, सर्व्वलोक, सर्वपुरुष, सर्व्वभूमि, प्रयोग, परस्त्री, (राजपुरुषात् ष्यञि) सूत्रनड़, आकृतिगणोयम्। तेनाभिगम, अधिभूत, अधिदेव, चतुर्विद्या, इत्यादयोऽन्येऽपि।

**अनुशय** पु॰अनु+शीङ्-अच्। अत्यन्तद्वेषे, पश्चात्तापे, पूर्ववैरे च। अनुगतः शयं हस्तं गतिस॰ हस्तानुगते त्रि॰। तत्र क्रीतादिपदार्थविशेषेणानुशयस्वरूपादि नारदेनोक्तम्। "क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते"। तत्र च यस्मिन्नहनि पण्यं क्रीतन्तस्मिन्नेवाह्नि तदविकृतं प्रत्यर्पणीयमिति तेनैवोक्तम्। "क्रीत्वा मूल्येन यत् पण्यं दुःक्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाह्न्यविक्षतमिति"। द्वितीयादिदिने तु प्रत्यर्पणे विशेषस्तेनैवोक्तः। "द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत्। द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तदिति"। परतोऽनुशयो न कर्त्तव्य इत्यर्थः। एतच्च वीजादिव्यतिरिक्तोपभोगादिविनश्वरवस्तुविषयम्। वीजादिक्रये पुनरन्य एव प्रत्यर्पणेऽवधिरित्याह। "दशैक-